শ্রীঃ
শ্রীমতে রামানুজায নমঃ
শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥ শ্রীনৃসিংহমঙ্গলম্ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥ শ্রীনৃসিংহমঙ্গলম্ ॥

ঘটিকাচল শৃঙ্গাগ্র ৱিমানোদর ৱাসিনে।
নিখিলামর সেৱ্যায নরসিংহায মঙ্গলম্॥ **1** ॥

উদীচীরঙ্গ নিৱসৎসুমনস্তোম সূক্তিভিঃ।
নিত্যাভিৱৃদ্ধ যশসে নরসিংহায মঙ্গলম্॥ **2** ॥

সুধাৱল্লী পরিষ্ৱঙ্গ সুরভীকৃত ৱক্ষসে।
ঘটিকাদ্রি নিৱাসায শ্রীনৃসিংহায মঙ্গলম্॥ **3** ॥

সর্ৱারিষ্ট ৱিনাশায সর্ৱেষ্ট ফলদাযিনে।
ঘটিকাদ্রি নিৱাসায শ্রীনৃসিংহায মঙ্গলম্॥ **4** ॥

মহাগুরু মনঃ পদ্ম মধ্য নিত্য নিৱাসিনে।
ভক্তোচিতায ভৱতাৎ মঙ্গলং শাশ্ৱতীঃ সমাঃ ॥ **5** ॥

শ্রীমত্যৈ ৱিষ্ণুচিত্তার্য মনোনন্দন হেতৱে।
নন্দনন্দন সুন্দর্যৈ গোদাযৈ নিত্যমঙ্গলম্॥ **6** ॥

শ্রীমন্মহাভূতপুরে শ্রীমৎকেশৱ যজ্ৱনঃ।
কান্তিমত্যাং প্রসূতায যতিরাজায মঙ্গলম্॥ **7** ॥

পাদুকে যতিরাজস্য কথযন্তি যদাখ্যযা।
তস্য দাশরথেঃ পাদৌ শিরসা ধারযাম্যহম্॥ **8** ॥

শ্রীমতে রম্যজামাতৃ মুনীন্দ্রায মহাত্মনে।
শ্রীরঙ্গৱাসিনে ভূযাৎ নিত্যশ্রীঃ নিত্যমঙ্গলম্॥ **9** ॥

সৌম্যজামাতৃ যোগীন্দ্র চরণাম্বুজ ষটপদম্।
দেৱরাজগুরুং ৱন্দে দিৱ্যজ্ঞানপ্রদং শুভম্॥ **10** ॥

ৱাধূল শ্রীনিৱাসার্য তনযং ৱিনযাধিকম্।
প্রজ্ঞানিধিং প্রপদ্যেঽহং শ্রীনিৱাসমহাগুরুম্॥ **11** ॥

চণ্ডমারুত ৱেদান্তৱিজযাদি স্ৱসূক্তিভিঃ।
ৱেদান্ত রক্ষকাযাস্তু মহাচার্যায মঙ্গলম্॥ **12** ॥

॥ ইতি শ্রীনৃসিংহমঙ্গলং সমাপ্তম্॥